# संस्कृतवार्ता:

दिनाङ्क : 20/08/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- भारतीय-प्रबन्धन-संस्थानां संशोधनात्मक-विधेयकं पञ्चविंशत्यधिक-द्विसहस्रतमं संसदा स्वीकृतम्, अद्य राज्यसभाया च अनुमोदितम्।
- राष्ट्रीय-जनतांत्रिक-गठबंधन इति पक्षतः उपराष्ट्रपतिपदस्य अभ्यर्थीभूतः सी.पी. राधाकृष्णन् वर्यः अद्य संसदभवने नामाङ्कनं पूरितवान्।
- कर्मचारी भविष्यनिधि-सङ्घटनेन अस्मिन् वर्षे जूनमासे पादोनद्वादशाधिक-लक्षसदस्यानां सार्वकालिकं सर्वाधिकं योगम् अभिलिखितमस्तीति उक्तम्।
- छत्तीसगढ-राज्ये दशमहिलाभिः सह एकोनत्रिंशत् माओवादिनः अद्य शस्त्राणि त्यक्त्वा शरणागताः अभवन्।
- अफगानिस्तान्-देशस्य हेरात्-प्रान्ते मार्गदुर्घटनायां मृतानां सङ्ख्या एकोनाशीतिः अभवत्।
- अद्य कज़ाकिस्तान्-देशस्य शिम्केण्ट्-नगरे एशियन्-शूटिङ्ग्-चैम्पियन्शिप् इति क्रीडायां दश मीटर्-एयर्-पिस्तोल्-मिश्रित-दलस्य कांस्यपदकं भारतीय दलेन विजितम्।

---

<u>आरएस-आईआईएम बिल</u>

भारतीय-प्रबन्धन-संस्थानां संशोधनात्मक-विधेयकं पञ्चविंशत्यधिक-द्विसहस्रतमं संसदेन स्वीकृतम्, अद्य राज्यसभया च अनुमोदितम्। लोकसभायां ह्यः विधेयकं स्वीकृतमासीत्। तत्पूर्वं, उच्चसभायां विधेयकं प्रस्थापयन् केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानः अवदत् यत् एतत् विधेयकं भारतीय-प्रबन्धन-संस्थान-अधिनियम-सप्तदशोत्तर-द्विसहस्रतमस्य संशोधनं करिष्यतीति। सः अवदत् यत् विधेयकमिदं देशस्य ऐशान्य-प्रदेशस्य महत्त्वपूर्णकेन्द्रे आसाम-राज्यस्य गुवाहाटी-नगरे भारतीय-प्रबन्धन-संस्थानस्य स्थापनां कर्तुं प्रयतते। देशे सम्प्रति एकविंशतिः आई. आई.

एम. इत्याख्याः संस्थाः सन्ति, ताः च शिक्षाक्षेत्रे **ब्राण्ड** इत्यभिधिया परिणताः सन्ति इति मन्त्री उक्तवान्। श्री प्रधानः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी पूर्वोत्तरस्य युवभ्यः कार्यं कुर्वन्नस्तीति। संसच्च पूर्णदिवसाय सम्प्रति स्थगितमस्ति।

---------------------------------------------

## राधाकृष्णन-नामाङ्कनम्

**राष्ट्रीय-जनतांत्रिक-गठबंधन**-एन्. डी. ए. इति पक्षतः उपराष्ट्रपतिपदस्य अभ्यर्थीभूतः सी.पी. राधाकृष्णन् वर्यः अद्य संसदभवने नामाङ्कनं पूरितवान्। अवसरेऽस्मिन् प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रीयमन्त्री अमितशाहः, राजनाथसिंहः, जे. पी. नड्डाः, किरेन रिजिजुः, एल. जे. पी. (आर्) दलस्य चिरागपासवानः, जे. डी. (यू) पक्षस्य राजीव-रञ्जन-सिंहः, एन. सी. पी. पक्षस्य प्रफुल्ल पटेलेन सह एन. डी. ए. समवायस्य अन्ये च नेतारः उपस्थिताः आसन्। उपराष्ट्रपतिनिर्वाचने नामाङ्कनकरणात् प्राक्, सी. पी. राधाकृष्णन् वर्यः संसदभवनस्य परिसरे प्रेरणास्थले पुष्पांजलिम् अर्पितवान्, यत्र भारतस्य प्रमुखनेतॄणां स्वातन्त्र्य-योद्धॄणाञ्च प्रतिकृतयः सन्ति। विपक्षस्य I.N.D.I.A ब्लाक् इति पक्षतः उपराष्ट्रपतिनिर्वाचने प्रत्याशीभूतः सर्वोच्चन्यायालयस्य पूर्वन्यायाधीशः बी. सुदर्शन रेड्डी इत्येषः श्वः नामाङ्कनं पूरयिष्यति। अग्रिममासस्य नवमे दिनाङ्के च उपराष्ट्रपतिनिर्वाचनं भविष्यति।

---------------------------------------------

## ई. पी. एफ्. ओ-पेरोल् दत्तांशः

कर्मचारी-भविष्यनिधि-सङ्घटनेन अस्मिन् वर्षे जूनमासे पादोन-द्वादशाधिक-लक्षसदस्यानां सार्वकालिकं सर्वाधिकं योगम् अभिलिखितमस्तीति उक्तम्। एतत् अङ्कं सपादनवप्रतिशतस्य-प्रायः वृद्धिं निर्दिशति।

---------------------------------------------

## छत्तीसगढ-शरणागतिः

छत्तीसगढ-राज्ये दशमहिलाभिः सह एकोनत्रिंशत् माओवादिनः अद्य शस्त्राणि त्यक्त्वा शरणागताः अभवन्। तेभ्यः प्रायः पञ्चविंशति लक्षरूप्यकाणां पुरस्कारस्य घोषणा कृता आसीत्। शरणागतानां मध्ये एकविंशतिः माओवादिनः दन्तेवाडा-मण्डले शस्त्राणि समर्पितवन्तः, अष्टौ नारायणपुर-मण्डले आरक्षकाणां, केन्द्रीय-सशस्त्र-बलानां च वरिष्ठ-अधिकारिणां समक्षं शरणागताः अभवन्।

-----------------------------------------------

## ऑनलाइन क्रीडा विधेयक

अद्य आई टी अथ इलेक्ट्रानिक्स् मन्त्री अश्विनी वैष्णवः अस्य वर्षस्य ऑनलाईन गेमिङ्ग् इत्यस्य प्रचारः विनिमयनञ्चाख्यं विधेयकम् लोकसभायाः पुरःस्थापितवान्। अस्य विधेयकस्य उद्देश्यः एतादृशानां क्रीडानां प्रतिकूलताभिः सामाजिक-आर्थिक-मनोवैज्ञानिक-गोपनीयतादिभिः प्रभावात् व्यक्तेः, विशेषतः यूनां, निर्धनजनसङ्ख्यायाश्च रक्षणमस्तीति।

-----------------------------------------------

## अफगानिस्तान्-दुर्घटना

अफ्गानिस्तान्-देशस्य हेरात्-प्रान्ते मार्गदुर्घटनायां मृतानां सङ्ख्या एकोनाशीतिः अभवत्। अधिकारिणः अवदन् यत्, ईरान्-देशस्य हेरात्-नगरेण सह सम्बद्धे राजमार्गे गतरात्रौ यात्रिक-बस-यानस्य मोटर्बाईक-यानस्य, लघु-ट्रक् इति यानस्य च संघट्टः अभवत्। महिलाः बालकाः च आहत्य बहवः पीडिताः, इरान्-देशात् प्रत्यागताः अफगानिस्तान-शरणार्थिनः आसन्। दुर्घटनायाः कारणात् बस्-याने अग्निप्रकोपः अभवत्, येन अनेकेषां शवानां परिचयोऽपि दुष्करः जातोऽस्ति।

-----------------------------------------------

## जयशङ्कर रुस

विदेशमन्त्री डा. एस्. जयशङ्करः अद्य मास्को-नगरे रशियादेशस्य प्रतिनिधिभिः, प्रमुखैः विद्वद्भिः, चिन्तकैश्च सह वार्तालापम् अकरोत्। सामाजिक-प्रसारमाध्यमे, मन्त्री अलिखत् यत् ते भारत-रशिया-सम्बन्धेषु, समकालीनविश्व-भूराजनीतिविषये, भारतस्य दृष्टिकोणस्य विषये च चर्चां कृतवन्तः इति।

---------------------------------------------

रेखागुप्ता आक्रमणः

देहलीति केन्द्रशासितप्रदेशस्य मुख्यमन्त्रीभूतायाः रेखागुप्तायाः उपरि राष्ट्रिय-राजधान्यां तस्याः निवासस्थाने आक्रमणस्य अभियुक्तः देहली-नगरस्य आरक्षकैः निरुद्धः अस्ति। भाजपेति दलम् आक्रमणस्य निन्दाम् अकरोत्। देहली-भाजपा-अध्यक्षः विरेन्द्र-सचदेवः सूचितवान् यत् अभियुक्तः तत्र उपस्थितैः जनैः गृहीतः इति, अपि च आरक्षकैः अधिक-विवरणार्थम् अन्वेषणं प्रारब्धमिति।

देहली-राज्यस्य मन्त्रिमण्डलस्य मन्त्री परवेश-साहिब-सिङ्घः सामाजिक-माध्यमिक-प्रसारणे उक्तवान् यत् एषा घटना आत्यन्तिकतया निन्दनीया अस्तीति। आम् आदमी-पक्षस्य नेत्री तथा दिल्ली-विधानसभायाः विपक्षनेत्री **आतिशी** अपि आक्रमणस्य निन्दाम् अकरोत्। सामाजिक-माध्यम-प्रसारे सा उक्तवती यत्, प्रजातन्त्रे भिन्नाभि-प्रायस्य विरोधस्य च स्थानम् अस्ति, परन्तु हिंसायाः स्थानं नास्तीति।

---------------------------------------------

एशियन् शूटिङ्गः

अद्य कज़ाख्स्तान्-देशस्य शिम्केण्ट्-नगरे एशियन्-शूटिङ्ग्-च्याम्पियन्शिप्-क्रीडायां दश मीटर्-एयर्-पिस्तोल्-मिश्रित-दलस्य कांस्यपदकं भारतीय सौरभ्-चौधरी सुरुचि-इन्दर्-सिङ्घ्

इत्येताभ्यां चैनीस्-तैपेय् इत्येतं पराजित्य प्राप्तम्। समग्रतया, अद्यावधि आयोजितेषु सर्वासु स्पर्धासु भारतं षट् स्वर्णपदकानि, पञ्च रजतपदकानि, त्रीणि कांस्यपदकानि च प्राप्नोत्।

---------------------------------------------------

## क्रीडा-हॉकी

हॉकी इण्डिया इत्यनेन अद्य अगस्तमासस्य एकोनत्रिंशतः दिनाङ्कात् सेप्टेम्बरमासस्य सप्तम-दिनाङ्कपर्यन्तं बिहार-राज्ये आयोज्य-मानायाः आगामि-पुरुष-एशिया-कप इत्याख्यै क्रीडायै अष्टादश-सदस्य-ईय-दलस्य घोषणा कृता। हरमनप्रीत **सिंह श्च** अस्यां महाद्वीपीय-प्रतियोगितायां नायकत्वेन निरन्तरं कार्यं करिष्यति।

---------------------------------------------------

## मो रक्षा-रन् संवादः

रक्षामन्त्रालयेन महू-नगरस्य सेना-युद्ध-महाविद्यालये "रणसंवाद्-**कन्वर्सेशन्स् आन् वार्, वार्फेर्, एण्ड् वारफाइटिङ्ग्**" इति स्वप्रकारस्य प्रथमस्य त्रि-सेवा-संगोष्ठ्याः आयोजनं क्रियते। संगोष्ठ्यां युद्धस्य परिवर्तनशीलप्रकृतिं, परिचालन-योजनां, रणनीतिं, रणनीतिषु तेषां प्रभावादि विषयेषु चर्चा भवति।

।। इति वार्ता ।।